# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

### अध्याय २

तं तु शोकपरिद्यूनं रामं दशरथात्मजम् ।
उवाच वचनं श्रीमान्सुग्रीवः शोकनाशनम् ॥ १॥

किं त्वं सन्तप्यसे वीर यथान्यः प्राकृतस्तथा ।
मैवं भूस्त्यज सन्तापं कृतघ्न इव सौहृदम् ॥ २॥

सन्तापस्य च ते स्थानं न हि पश्यामि राघव ।
प्रवृत्तावुपलब्धायां ज्ञाते च निलये रिपोः ॥ ३॥

धृतिमाञ्शास्त्रवित्प्राज्ञः पण्डितश्चासि राघव ।
त्यजेमां पापिकां बुद्धिं कृत्वात्मेवार्थदूषणीम् ॥ ४॥

समुद्रं लङ्घयित्वा तु महानक्रसमाकुलम् ।
लङ्कामारोहयिष्यामो हनिष्यामश् च ते रिपुम् ॥ ५॥

निरुत्साहस्य दीनस्य शोकपर्याकुलात्मनः ।
सर्वार्था व्यवसीदन्ति व्यसनं चाधिगच्छति ॥ ६॥

इमे शूराः समर्थाश्च सर्वे नो हरियूथपाः ।
त्वत्प्रियार्थं कृतोत्साहाः प्रवेष्टुमपि पावकम् ॥ ७॥

एषां हर्षेण जानामि तर्कश्चास्मिन्दृढो मम ।
विक्रमेण समानेष्ये सीतां हत्वा यथा रिपुम् ॥ ८॥

सेतुरत्र यथा वध्येद्यथा पश्येम तां पुरीम् ।
तस्य राक्षसराजस्य तथा त्वं कुरु राघव ॥ ९॥

दृष्ट्वा तां हि पुरीं लङ्कां त्रिकूटशिखरे स्थिताम् ।
हतं च रावणं युद्धे दर्शनादुपधारय ॥ १०॥

सेतुबद्धः समुद्रे च यावल्लङ्का समीपतः ।
सर्वं तीर्णं च वै सैन्यं जितमित्युपधार्यताम् ॥ ११॥

इमे हि समरे शूरा हरयः कामरूपिणः ।
तदलं विक्लवा बुद्धी राजन्सर्वार्थनाशनी ॥ १२॥

पुरुषस्य हि लोकेऽस्मिञ्शोकः शौर्यापकर्षणः ।
यत्तु कार्यं मनुष्येण शौण्डीर्यमवलम्बता ।
शूराणां हि मनुष्याणां त्वद्विधानां महात्मनाम् ॥ १३॥

विनष्टे वा प्रनष्टे वा शोकः सर्वार्थनाशनः ।
त्वं तु बुद्धिमतां श्रेष्ठः सर्वशास्त्रार्थकोविदः ॥ १४॥

मद्विधैः सचिवैः सार्थमरिं जेतुमिहार्हसि ।
न हि पश्याम्यहं कं चित्त्रिषु लोकेषु राघव ॥ १५॥

गृहीतधनुषो यस्ते तिष्ठेदभिमुखो रणे ।
वानरेषु समासक्तं न ते कार्यं विपत्स्यते ॥ १६॥

अचिराद्द्रक्ष्यसे सीतां तीर्त्वा सागरमक्षयम् ।
तदलं शोकमालम्ब्य क्रोधमालम्ब भूपते ॥ १७॥

निश्चेष्टाः क्षत्रिया मन्दाः सर्वे चण्डस्य बिभ्यति ।
लङ्घनार्थं च घोरस्य समुद्रस्य नदीपतेः ॥ १८॥

सहास्माभिरिहोपेतः सूक्ष्मबुद्धिर्विचारय ।
इमे हि समरे शूरा हरयः कामरूपिणः ॥ १९॥

तानरीन्विधमिष्यन्ति शिलापादपवृष्टिभिः ।
कथं चित्परिपश्यामस्ते वयं वरुणालयम् ॥ २०॥

किमुक्त्वा बहुधा चापि सर्वथा विजयी भवान् ॥ २१॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com